॥ इति गृह्यसूत्रप्रारंभः ॥ रामः ॥

श्रीगणेशायनमः॥ हरिः ३ ॐ॥ उक्तानिवैतानिकानिगृह्याणिवक्ष्यामस्त्रियः पाकयज्ञाहुताअग्नौ हूयमानाअ
नग्नौ प्रहुता ब्राह्मणाभोजने ब्रह्मणिहुता अथाप्यत्र उदाहरंतियःसमिधायआहुतीयोवेदेनेतिसमिधये
वापिश्र द्धानआदधन्मन्येतयजदामितिनमस्तस्मैयआहुत्यायोवेदेनेतिविधये वाप्यस्तिप्रीतिस्तदेतं
तस्यैनऋषिरुवाच। अगोरुथायगविषेयुक्षायदस्यंवचः॥ घृतास्वादीयोमधुनश्चवोघृतमित्यवरएवमहर्
घृताच्चमधुनश्चस्वादीयोस्तित्रीतिःस्वादीयोस्त्वित्येवतदाह॥ आतेअग्नऋचाहविर्हृदातक्षंभरामसि॥
तेतेभवंतूक्षणऋषभासोवशाउतेतेयतएवमउक्षाणश्चऋषभाश्चवशाश्चभवंतियदमंत्रंस्वाध्यायस
धीयतइतियोनमसास्वधयरइतिनमस्कारेणावैरवल्वपिनवैदेवानमस्कारमतियज्ञोवैनमइतिहोवै
ब्राह्मणंभवति॥ १॥ अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयादग्नयेस्वाहाग्नयेइदंनमसोमायवनस्पतयेस्वा
हासोमायवनस्पतयइदंनमोमरुद्भ्यःस्वाहामरुद्भ्यइदंनमोद्यावापृथिवीभ्यांस्वाहाद्यावापृथिवीभ्यामिदं
नमोविश्वेभ्योदेवेभ्यःस्वाहाविश्वेभ्योदेवेभ्यइदंनमोब्रह्मणेस्वाहाब्रह्मणइदंनमोऽनंतायस्वाहा
नंतायेदंनमोवासुकयेस्वाहावासुकयइदंनमोधृतराष्ट्रायस्वाहाधृतराष्ट्रायेदंनमोतक्षकायस्वाहा
तक्षकायेदंनमोकालियायस्वाहाकालियायेदंनमोमणिभद्रायस्वाहामणिभद्रायेदंनमोपूर्णभद्रायस्वाहा
पूर्णभद्रायेदंनमोयक्षेभ्यस्वाहायक्षेभ्यइदंनमोगुह्यकेभ्यस्वाहागुह्यकेभ्यइदंनमोगंधर्वेभ्यस्वाहा
गंधर्वेभ्यइदंनमोऽप्सरोभ्यस्वाहाऽप्सरोभ्यइदंनमोनिधिपतयेस्वाहानिधिपतयेइदंनमोविरूपाक्षाय
स्वाहाविरूपाक्षायेदंनमोमहतेस्वाहामहतइदंनमोदंडायस्वाहादंडायेदंनमोनिर्ऋत्यैस्वाहानिर्ऋत्यैइदं
नमोगणेभ्यस्वाहागणेभ्यइदंनमोग्रामेभ्यस्वाहाग्रामेभ्यइदंनमोविश्वेभ्यःस्वाहाविश्वेभ्यइदंनमो
वनेभ्यस्वाहावनेभ्यइदंनमोवानस्पत्येभ्यस्वाहावानस्पत्येभ्यइदंनमोमयूखेभ्यस्वाहामयूखेभ्यइदं
नमोमरीचिभ्यस्वाहामरीचिभ्यइदंनमोवायवेस्वाहावायवेइदंनमोवायव्येभ्यस्वाहावायव्येभ्यइदं
नमोवायुमंडलेभ्यस्वाहावायुमंडलेभ्यइदंनमोऽग्नयेस्वाहाऽग्नयेइदंनमोऽग्निमंडलेभ्यस्वाहाऽग्नि
मंडलेभ्यइदंनमोदिवेस्वाहादिवेइदंनमोदिवाकरेभ्यस्वाहादिवाकरेभ्यइदंनमोरक्षोभ्यस्वाहारक्षो
भ्यइदंनमःस्वधापितृभ्यइतिप्राचीनावीतीशेषंदक्षिणानिनयेत्॥ २॥ अथशिरःशेषं॥ अथगृहबलिदेवता
नांकीर्तयिष्यामोयत्रयत्रवसंतिते॥ द्वारेपितामहंविद्यात्स्रक्ष्णीलेचउमापतिं॥ आग्नेय्यांबलभद्रंचयम
विघ्नंचदक्षिणे॥ नैर्ऋत्यांस्कंदरूपंचसोमंसूर्यंचपश्चिमे॥ वायव्यामश्विनौवसवःसोमोरुद्रउत्तरस्यां
दिशि॥ ईशान्यांनक्षत्राणिईशहाःपूर्वस्यांदिशि॥ गृहमध्येब्रह्माणंप्रतिष्ठाप्यऋद्धिवृद्धिश्रियाकीर्ति
स्थिति॥ ततःस्नात्वाबलित्रयंगृहांगणेदेयंविहितं॥ येभूताःप्रचरंतिदिवानक्तंबलिमिच्छंतोविदुरस्यप्रेष्याः॥
तेभ्योबलिंपुष्टिकामोहरामिमायिपुष्टिंपुष्टिपतिर्दधातुस्वाहा॥ ऐंइदंरूपायव्ययाम्यांनैर्ऋतिकाश्च
येतेकाकाःप्रतिगृह्णंतुभूम्यांपिंडोमयोज्झितं॥ वैवस्वतकुलेजातौद्वौश्यामशबलौशुनौ॥ताभ्यां
पिंडोमयादत्तोरक्षेतांपथिमांसदा॥ श्वचांडालभूतपतितवायसेभ्योन्नंभूमौनिक्षिपेत्॥ एतेसंस्था
यमोऽसियमदूतोसिवायसोऽसिनमोस्तुते॥ सप्तजन्मकृतंपापंबलिंभसंतुवायसः॥ कृमिकीटपतंगानांजंतूनांपापचारिणां॥तेसर्वेतृ

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

तस्मिन्नाधानुमयादक्षेत्र... गोदोहन... १
...मात्रंतत्रस्थिछत्वातिथिमाकांक्षेत्।। हरोपादौप्रक्षाल्याचर्म्यंगृहंप्रवेशयत्।।शंतापृथिवीशिवमंतरिक्षं
द्यौर्नोदेव्यभयंनोअस्तु।।शिवादिशःप्रदिशउद्दिशोर्नआपोविद्युतःपरिपांतुसर्वतः शांतिःशांतिःशांतिः॥
इतिपरिग्रहं।।१।।अथखलुयत्रकुंवहोष्यन्स्यादिषुमात्रावरंसर्वतःस्रुक्छिलमुपलिप्योल्लिख्यवत्सेरवा
उद्गायतींपश्चात्प्रागायतेनानांतयोस्तिस्रोमध्येतदृषभ्यास्त्रिःप्रतिशाप्यान्वाधायपरिस्तृणातिपरिस्तीर्य
पुरस्तात्क्षिणतःपश्चादुत्तरतस्रुक्सरुवंसंपर्युक्षणंपवित्राभ्यामाज्यस्यास्यन्नभिघारयन्ना
यावंतर्गर्भैप्रादेशमात्रौकुरौनानांतयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यांमुखानाभ्यांपाणिभ्यांसवि
लुप्टाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरितिप्रागुत्पुनातिसकृन्मंत्रेणाहुत्वा
हरीकृताकृतमाज्यहोमेषुपरिस्तरणंतथाज्यभागोपाकयज्ञेषुश्रुत्वाचधन्वंतरियज्ञशूलगवंवर्जमभु
ष्टेस्वाहेतिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वेदेवाअग्नेस्विष्टकृदेकंबर्हिरित्याज्यस्विष्टकृतःस्युस्क ॥२॥
ल्पकालास्तदेषाभियज्ञगाथागीयते।।पाकयज्ञांस्तंसंस्थाप्यैकाज्यानेकबर्हिषः।।एकःस्विष्टकृतंकुर्या

...नापिसतिदैवतइति।।३।।उद्गयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदानवि
वाहाःसार्वकालमेकेविवाहंनेषांपुरस्तात्तंत्रआज्याहुतीर्जुहुयादग्नआयूंषिपवसइतीतिस्टभिःप्रजा
पतेनत्वदेतान्यन्यइतिचर्याहुतिभिर्वसुचयमेकेनेकेकांचनत्वमर्यमाभवसियत्कनीनामितिविवाहे
चतुर्थे।।४।।कुलमग्रेपरीक्षेतयेमातृतःपितृतश्चेतियथोक्तंपुरस्ताद्बुद्धिमतेकन्याप्रयच्छेद्बुद्धिरूपशी
लदक्षण्यसंपन्नामरोगामुपयच्छेदुर्विवाहेयानिलक्षणान्यष्टौपिंडान्कृत्वाऋतमग्रेप्रथमंयेतऋतेस ५
संग्रहितांतिति।।यादेयंकुमार्यभिजातातदियमिहप्रतिपद्यतांयत्संयंतदृश्यतामितिपिंडानभिमंत्र्यकु
मारीमूयादेषामेकंगृह्णीतिक्षेत्रेचेदुभयतःसस्याद्बहुकीयादन्नवत्यस्याःप्रजाभविष्यतीतिविद्या
द्रोणाश्वमतीवेदिपुरीषाद्रुसवर्चस्विन्यविरासिनोदूरात्सर्वसंपन्नादेवनाकितवीचतुष्पथाद्वि
प्रव्राजिनीरिणादध्यान्नमरणानाशंतिभी।।५।।अलंकृतकन्यामुदकपूर्वांदद्यादेषब्राह्मोविवाह
स्तस्यांतोनोहादशावरान्हादशपरान्पुनात्यभयतऋत्विजेवितते कर्मणिदद्यादलंकृत्यस

दैवोदशावरान्दशपरान्पुनात्यभयतः सहधर्मचरनरति प्राजापत्योष्टावरानष्टपरान्पुनात्यभयतोगो
मिथुनंदत्वोपयच्छेतस आर्षः सप्तावरान्सप्तपरान्पुनात्यभयतो मिथः समयंकृत्वोपयच्छेतसगांधर्वो
धनंवोपतापोपयच्छेतस आसुरः सप्तानाप्रमत्तोनाधर्मेपहरेत्सपैशाचोहत्वाभित्वाचशीर्षाणिरुदतीरु
दक्योहरेत्स राक्षसः॥६॥ अथखलूक्तावाजनपदधर्मान्ग्रामधर्मांश्चतान्विवाहेप्रतीयाद्यन्नुसमानंत
र्हृस्यामःपश्चादग्नेर्दक्षदमश्मानंप्रतिष्ठाप्योत्तरपुरस्तादुदकुंभंसमन्वारब्धायाऽऽतिष्ठन्प्रेक्षमुख
प्राङ्मुख्याआसीनायाऽऽपोऽभिमंत्रयेसौभगत्वायहस्तमिमंगृभ्णामयेनपुष्यमेवगृह्णीयाद्यदिकामयेतपुमांसए
वमेपुत्राजायेरन्नियंगुलीरेवस्त्रीकामीरोमांतेहस्तंसांगुष्ठमुभयकामःप्रदक्षिणमग्निमुदकुंभंच
त्रिःपरिणयंजपत्यमोहमस्मिसात्वंसात्वमस्यमोहद्यौरहंपृथिवीत्वंसामाहमृक्तावेहविवहावहै॥
प्रजाप्रजनयावहैसंप्रियौरोचिष्णूसुमनस्यमानौजीवेवशरदःशतमितिपरिणीयपरिणीयाभ्यान ॥३॥
मारोहयतीममश्मानमारोहाश्मेवत्वंस्थिराभव॥सहस्वपृतनायतोभितिष्ठपृतन्यतइतिवध्वं

जलावुपस्तीर्यभ्राताभ्रातरंस्थानेवादिलीजानावपतित्रिर्जामदग्न्यानांप्रत्यभिघार्यहविरवत्तंचेषोवरान
धर्मोर्यमणंत्वदेवंकन्याअग्निमयक्षत॥सरमादेवोअर्यमाप्रेतोमुंचातुनामुतः स्वाहा॥वरुणंत्वदेवंकन्या
अग्निमयक्षत॥सरमादेवोवरुणःप्रेतोमुंचातुनामुतःस्वाहा॥पूषणंत्वदेवंकन्याअग्निमयक्षत॥सरमादे
वःपूषाप्रेतोमुंचातुनामुतःस्वाहेत्यंगुष्ठेनांगुष्ठंप्रदेशिन्यास्रुचेवजुहुयादपरिणीयभूर्पपुटेनाभ्यात्मंतूष्णीचतु
र्थमाज्याप्यहेकेराजानंपरिणायंतितथोत्तमेआहुतीनांसंनिपतितोथास्येशिरोवेमिमुञ्चतियदिरूतेभव
तऊर्णासूकंकेशपक्षयोर्बद्धेभवतःप्रतामुंचामिवरुणस्यपाशादितिसक्तरामुत्तरयाथैनांपरिजिता म
यांदिशिसप्तपदान्यभ्युक्रामयतीषएकपदीऊर्जेद्विपदीरायस्पोषायत्रिपदीमायोभव्यायचतुष्पदी
प्रजाभ्यःपंचपद्यृतुभ्यःषट्पदीसखासप्तपदीभव॥सामामनुव्रताभव॥पुत्रान्विंदावहैबहूंस्तेभ्य
संतुजरदष्टयस्तथाभवोःसंनिधायाग्निंपश्चादुदकुंभेनावसिच्यब्राह्मणांश्चवाचयित्वाजीवपत्यजी
वप्रजायाअगारंरुदंतीरजीवसेदुनमरुंधतीसप्तऋषीनितिदृष्ट्वावंविसृजेतजीवपत्नीप्रजांवि

देयेति॥७॥प्रयाणउपपद्यमानेपूषाखेतोनयतुहस्तगृह्येतियानमारोहयेदृग्भन्वतीरीयतेसंरभध्वमित्यर्द्ध
र्चेननावमारोहयेदुत्तरेणोल्मुकमयज्ञोवरुद्यतीतिकृदग्न्योर्विवाहाग्निमग्रतोजस्रनयंतिकल्याणेपुदेशरक्ष
चतुष्पथेषुमाविदन्परिपंथिनरतिजपेद्वासेवासेसुमंगलीरियंवधूरितीक्षकानीक्षेतेहप्रियंप्रजयातेसमृ
ध्यतामितिगृहप्रवेशयेद्विवाहाग्निमुपसमाधायपश्चादास्यानडुहंचर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमतस्मि
नुपविशेयांसमञ्चारब्ध्यायमानःप्रजांजनयतुप्रजापतिरितिचतस्रभिःप्रत्यृचंजुहुयात्समंजंतुविश्वेदेवा
इतिद्वाभ्यांप्राश्यप्रतिप्रयच्छेदाज्यशेषंवाबंनान्तेहृदयेतऊर्ध्वमक्षारालवणान्निनोब्रह्मचारिणावल
कुर्वाणावधःशायिनौस्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंवैकऋषिर्जीयतइतिचरितव्रतःसूर्यायदेव
धूरसीतिदधानंब्राह्मणोभ्योथस्वस्ययनंवाचयीत॥८॥पाणिग्रहणादिरग्निंपरिचरेत्स्वयंपत्न्य
पिनापुत्रःकुमार्यंतेवासीवानिस्यानुग्रहीतःस्यादितिपशाम्येत्समित्पाणिर्ब्रह्मचारी॥९॥ ॥४॥
णाद्युष्करपाहोमकालेव्याख्यातोहोम्यैचमांसवर्जंकामंतुन्नीहियवतिलेरग्नयेस्वाहेतिसा

यंजुहुयात्सूर्यायस्वाहेतिप्रातस्तूष्णींहुतीयेहुभयत्र॥९॥अथपार्वणःस्थालीपाकःस्तस्यरजापूर्णमासा
भ्यामुपवासहृभावहिषोश्वसंज्ञंहनंदेवताश्चोपांशुयाजेहमहेहनजंकाम्याहतरासस्यैतस्यैदेवतायै
चतुरश्रलुरोमुष्णीनिर्वपतिपवित्रेअंतर्धायामुष्मैत्वाजुष्टंनिर्वपामीत्यथैनंप्रोक्षतियथानिरुप्तममु
ष्मैत्वाजुष्टंप्रोक्षामीत्यवहंतस्त्रिःफलीकृतान्नानाश्रपयेत्समोप्यवायदिनानाश्रपयेद्विभज्यतंडु
लानभिमृशेदिदममुष्मादधममुष्मादितियघुवैसमोप्यथुद्वारंजुहुयाच्छतानिहवींष्यभिघार्यो
दगुद्वास्यबर्हिष्यासाद्यप्रत्यभिघार्यैधममभिघार्योयंतइध्मआत्माजातवेदस्तेनेध्यस्वयद्वेवेद्व
वर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहेतितूष्णीमाघारावाघार्याज्यभागौ
जुहुयादग्नयेस्वाहासोमायस्वाहेत्यंतरमाग्नेयंदक्षिणंसोम्यंविशायतेचक्षुषीवाएतेयत्तस्य
यदाज्यभागौतस्मात्पुरुषस्यप्रत्यङ्मुखस्यासीनस्यदक्षिणमक्ष्यंतरंभवत्यंतरंदक्षिणमध्ये
हवींषिप्रत्यक्षंरवौप्राक्संस्थान्युदक्संस्थानिवोत्तरपुरस्तात्सौविष्कृतमध्यास्पूर्वाद्वाग्रह

विषोवघति मध्यासूर्यौत्सश्रार्थादितिपंचावत्तिनामुत्तरार्द्धसौविष्टकृतंनात्रहवींषिप्रत्यभिचारयति
स्विष्टकृतंहिरभिचारयति॥यद्दर्यकृमणोसरीसृपंयद्वान्यूनमिहाकरं॥अग्निष्टत्सिष्टकृद्धुतःसर्वंस्विष्टं सुहुतंकरोतुमे॥अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्द्धयित्रेसर्वान्नः
कामान्त्समर्द्धयत्यहैतिबर्हिषिपूर्णपात्रेनिनयेदेषावैयथापाकयज्ञानामेतत्तंत्रंहविरुच्छिष्टदक्षिणा
॥१०॥अथपशुकल्पउत्तरतोग्नेःशामित्रस्यायतनंकृत्वापायित्वापशुमालभ्यपुरस्तात्प्रयङ्मु
खमवस्थाप्याग्निंदृतमितिहाभ्यांहुत्वासपलाशायाद्रप्यारवयापत्रादुपस्पृशेदमुष्मैत्वाजुष्टंमु
पाकरोमीतिग्रीहियत्रेमतीभिरद्भिःपुरस्तात्प्रोक्षेन्मुष्मैत्वाजुष्टंप्रोक्षामीतिनासांपायित्वादक्षिण
मनुबाहुंरोषंनिनयेदाददतेवपर्यग्निकृत्वोदञ्चंनयंतित्स्यपुरस्तादुन्मुकंहरंतिशामित्रंएवभवति
वपाश्रपणीभ्यांकर्तापशुमन्वारभतेकर्तारंयमोजनःपश्वाशामित्रस्यप्राक्शिरसंप्रत्यक्शिरस
वोदक्पादंसंज्ञप्यपुरानाभेस्त्वापमंतर्धायवपामुत्खिद्यवपामवदायवपाश्रपणीभ्यांपरिश्रयाद्धि

तियथानिरूपम

रभिषिच्यशामित्रेप्रताप्यायेणेनाग्निंहृत्वादक्षिणतआसीनःश्रपयित्वापरीत्यजुहुयादेतस्मिंने
वाग्नौस्थालीपाकंश्रपयंत्येकादशिनोरवदानानिसर्वेभ्योवदायशामित्रेश्रपयित्वाहृदयशूलं
प्रताप्यस्थालीपाकस्याघतोजुहुयादवदातेवासहैकंस्यावदानस्याहुत्वाहुत्वाघस्याघातेवहृदय
शूलेनचरंति॥११॥चेत्ययज्ञेप्राक्स्विष्टकृतश्चेत्याय बलिंहरेद्यद्युवैविदेशास्यंपलाशादृतेनयत्रवैष
वनस्पतरश्चेतयर्चीहोपिंडौकृत्वोवीवधोपाधायदूतायप्रयच्छेदिमंतस्मैबलिंहरेतिचैनंब्रूयादयं
त्वभ्यमितियोदूतायप्रतिभयंवेदंतराशस्त्रमपिकिंचिन्नाव्याचेन्नघंतरास्यबरूपमपिकिंचिदनेन
तरितव्यमितिधन्वंतरियज्ञेब्रह्माणमग्निंचांतरापुरोहिताग्नेबलिंहरेत्॥१२॥उपनिषदिगर्भलं
भनंपुंसवनमनवलोभनंचयदिनाधीयास्तीयेगर्भमासेतिष्येणोपोषितायाःसरूपवत्सायागो
र्दधनिहौहौनुमाषौयवंचदधिप्रस्तेनप्राश्नायेत्किंपिनासिकिंपिबसीतिपृच्छापुंसवनंपुंसवन
मितित्रिःप्रतिजानीयादेवंस्त्रीप्रसूतानथास्येमंडलागारच्छायायांदक्षिणापस्यनासिकाया

मजीतामोषधीनस्तः करोतिप्रजावज्जीवपुत्राभ्यांहैके॥आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं॥आधीरो
जायतांपुत्रस्तेदशमास्यः॥अग्निरेतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतुमृत्युपाशात्॥तदयंराजाव
रुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदात्॥प्राजापत्यस्यस्थालीपाकस्यहुत्वाहृदयदेशमस्या
आलभेतयत्तेसुशीमेहृदयेहितमतःप्रजापतौ॥सन्यहंमांसंनहिहृदासंमाहंपौत्रमघंनियामिति॥१३॥
चतुर्थेगर्भमासेसीमंतोन्नयनमापूर्यमाणपक्षेयदापुंसानक्षत्रेणचद्रमायुक्तःस्याद्यथाग्निमुपस
माधायपश्चाद्स्थानद्वहंमास्तीर्यप्राग्ग्रीवमुत्तरलोमताजिनेनुपविष्टायासमन्वारब्धायांधाता
ददातुदाशुषइतिद्वाभ्यांराकामहमितिद्वाभ्यांनेजमेषइतिस्रिभिःप्रजापतेनत्वदेतान्यन्यइति चा
थास्यैयुग्मेनशलाकयुग्मपत्रेणन्यग्रोधशुंगाभ्यांत्रिभिश्चकुशपिंजूलैरूर्ध्वंसीमंतंव्यूहति॥भूर्भु
वःस्वरोमितित्रिभिश्चतुर्वावीणागाथिनोसंगास्तिसोमंराजानंसंगायेतामितिसोमोनोराजाव
तुमानुषीप्रजानिविश्चकासावितियानदीमुपवसितामवंतिब्राह्मण्यश्चरंतीजीवपत्यो ॥ ६ ॥

जीवप्रजायधनुपदिशेयुस्तत्तथाकुर्यादृषभोदक्षिणा॥१४॥कुमारंजातंपुरान्यैरालंभात्सर्पिर्मधु
नीहिरण्यकोनिधेहिरण्येनप्राशयेत्तेदद्मिमधुनोक्षतस्यवेदसाविताप्रसूतंमघोनां॥आयु
ष्मान्गुप्तोदेवताभिःशतंजीवशरदोलोकेअस्मिंस्तिकर्णयोरुपनिधायमेधाजननंजपतिमेधांतेदेवः
सविताप्रयच्छतुमेधांदेवीसरस्वती॥मेधांतेअश्विनोदेवावाधत्तांपुष्करस्रजाविश्वंसावभिमशाय्भ्मा भवपर
शुर्भवहिरण्यमस्तृतंभवा॥वेदोवैपुत्रनामासिसजीवशरदःशतमितीदंश्रेष्ठायज्ञियायनिधेह्यस्मि
प्रयंधिमघवन्जीविंनितिचनामचास्मदघुघोषवदायंतरंतस्थमभिनिधानांतंघक्षरंचतुरक्षरं
वाघक्षरंप्रतिष्ठाकामश्चतुरक्षरंनसवर्चसकामोयुग्मानिलेवपुंसामयुजानिस्त्रीणामभिवा
दनीयंचसमीक्षेतनन्मातापितरौहिघातामोपनयनासेवासादेयपुत्रस्यशिरःपरिरघ्रज्पत्य
गादंगात्संभवसिहृदयादधिजायसे॥आत्मावैपुत्रनामासिसजीवशरदःशतमितिमूर्धानंत्रिर
वघ्रायाहतेवकुमार्यै॥१५॥षष्ठेमासेन्नप्राशनंमाजमंनाघकामस्तेनिरंनसवर्चसकामोघ

तौदनंतेऽस्कामोदधिमधुघृतमिश्रमन्नंप्राशयेदन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥प्रप्रदातारं
रंतारमिषऽऊर्जनोधेहिद्विपदेचतुष्पदेऽस्यावतैवकुमार्यै॥१६॥तृतीयेवर्षेचोलंयथाकुलधर्मंनीवृतो
नेऽक्षहिरण्यवमाषतिलानाप्यथपूर्णशरावाणिनिदधातिपश्चात्कारयिष्यमाणोमातुरुपस्थआनडुहं
गोमयेनवेशरावेशमीपर्णानिचोपानहितानिभवंतिमातुःपितादक्षिणतएकविंशतिकुशपिंजूलान्या
दायब्रह्मावेतानिधारयेयुश्चात्कारयिष्यमाणस्यावस्थायशीतोष्णाआपःसमानीयोष्णेनवायउद्व
केनेतिताभिःस्नपनवनीतंदधिदूर्वान्वापदक्षिणंशिरस्त्रिरुदस्यदितिःकेशान्वपत्वापउंदंतुवर्च
सइतिदक्षिणोत्तरेशापश्चत्रीणित्रीणिकुशपिंजूलान्यात्मानमाप्यायिनिदधातियोषवैत्रायस्वेनंस्वाधिते
मैनंहिंसीरितिनिष्प्लाव्यलोहेनक्षुरेणप्रक्षिणत्तियेनावपत्सवितुःक्षुरेणसोमस्यराज्ञोवरुणस्य
विद्वान्॥तेनब्रह्मणोवपतेदमस्यायुष्मांजरदष्टिर्यथासइतिप्रक्षिणत्तिप्रक्षिणत्त्यग्रेशीर्षाः ॥६॥
सहमानेत्रयछतिनानडुहेगोमयेनिदधातियेनधातारंहस्तेरन्तेरिंद्रस्यचायुषेवपत॥तेन

तआयुषेवपामिसुश्लोक्यायस्वस्तयइतिद्वितीयंयेनभूयश्चरात्र्यांज्योक्चपश्यातिसूर्यं॥तेनतआयु
षेवपामिसुश्लोक्यायस्वस्तयइतितृतीयंसर्वेभ्यैश्चतुर्थमेवमुत्तरतस्त्रिःक्षुरतेजोनिमज्जेद्यद्धो
रेणमर्त्यतासुपेशासावत्तावपसिकेशान्॥शुंधिशिरोमार्ष्टायुःप्रमोषीरितिनापितंशिष्याछीतो
ष्णाभिरद्भिरवर्धंकुर्वाणोऽपवक्रुशलीकुर्वंतियथाकुलधर्मंकेशेशान्कारयेतैवकुमार्यै॥७॥
एतेनगोदानंषोडशेवर्षेकेशान्दद्युश्चत्वारोऽन्येकारयेरन्श्मश्रूणीहोतिशुंधिशिरोमुखंमोष्यु
ःप्रमोषीरितिकेशश्मश्रूलोमनखान्युदकंसंस्थापनिकुर्वंतिसंप्रेष्यसालुप्यवाग्यतःस्थित्वाहुः
रोषमाचार्यसकाशेवाचंविसृजेतेवरंदद्यामीतिगोमिथुनंदक्षिणांसंवत्सरमादिशेत्॥१८॥अथैमं
चर्षेब्राह्मणमुपनयेद्गर्भैकादशेक्षत्रियंद्वादशेवैश्यमाषोडशाद्ब्राह्मणस्यानतीतःका
लआद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊर्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेन
ह्याध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरेषंचूडंकुमारंकुशालीकृताशिरसिमहतेनवासससंवी

तमेणेयेपाशाजिनेनब्राह्मणंरौरवेणक्षत्रियंमाजेनवैश्यंयदिनासंसिनसीरम्रक्तानिवसीरन्का
षायंब्राह्मणोमांजिष्ठंक्षत्रियोहारिद्रंवैश्यस्तेषांमेखलाभौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्या
वीवैश्यस्यतेषांदंडाःपलाशोब्राह्मणस्योदुंबरःक्षत्रियस्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मण
स्यललाटसंमितःक्षत्रियस्यप्राणसंमितोवैश्यस्य॥९॥सर्वेभ्यासर्वेषांस्मन्वारब्धेऽहतेनर
तोग्नेःप्राङ्मुखआचार्योवतिष्ठतेपुरस्तात्सूर्यङ्मुखइतरोपामंजलीपूरयित्वातत्सवितुर्देवीम
हूतिंपूर्वोनास्यपूर्णमवक्षारयत्यासिच्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ता
भ्यांहुस्तंगृह्णाम्यसाविति तस्यपाणिनापाणिंसंगृह्णीयात्सवितातेहस्तमग्रभीदसाविति
द्वितीयमग्निराचार्यस्तवासाविति तृतीयमादित्यमीक्षयेदेवसवितरेषतेब्रह्मचारीतंगोपाय
समाप्तेत्याचार्यःकस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरिददा
मीतियुवासुवासाःपरिवीतआगादित्यृचेनेनप्रदक्षिणमावर्तयेत्तस्याध्यसोपाणीकृत्वा

॥८॥

हृदयदेशमालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्मचारीतूष्णींसमिधमादध्यान्नूंसीवेब्राह्मापत्यंप्रा
जापत्योब्रह्मचारीभवतीतिविज्ञायते॥२०॥तूंमंत्रेणहैकेनयेसमिधमाहार्षंबृहतेजातवेदसे॥त
यात्वमग्नेवर्चसेसमिधाग्नेयंत्वाहार्षंसमिधमाधायाग्निमुपस्पृश्यमुखंनिमार्ष्टिमेधां
तेजसासामासमनज्मीतितेजसाह्येवात्मानंसमनक्तीतिविज्ञायतेमायमेधांमायप्रजांमय्यग्नि
स्तेजोदधातुमयिमेधांमयिप्रजांमयींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोद
धातु॥यतेअग्नेतेजस्तेनाहंतेजस्वीभूयासंयतेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासंयतेअग्नेइर
स्तेनाहमिरस्वीभूयासमित्यपस्थायजुन्वाच्योपसंगृह्यब्रूयाद्दधिक्राव्णोःसावित्रीमेऽनुब्रू
हीतितस्यवासस्यापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वाहपच्छोर्ध्वंवाशोःसर्वंयथाशक्तिवा
चयीतहृदयदेशेस्योर्ध्वंमुलिंपाणिमुपदधातिममब्रह्मन्हृदयंतेदधामिममचित्तमनुचित्तं
तेअस्तु॥ममवाचमेकमनोनुपस्वरहस्पतिष्टानियुनक्तुमह्यमिति॥२१॥मेखलामाब

ध्ये दंडं प्रदाय ब्रह्मचर्यमादिशेद्ब्रह्मचार्यस्यपोशानकर्मकुरुष्वाचार्याधीनोवेदम
धीष्वेति द्वादशवर्षाणि वेदब्रह्मचर्यं ग्रहणांतं वासायंप्रातर्भिक्षेतसायंप्रातः समिधमादध्याद
प्रसारव्यायिनमग्नेभिक्षेताप्रसारव्यायिनीमाभवान्भिक्षांदेहीत्यनुप्रवचनीयमितिवेतदा
चार्यायवेदयीतनतिष्ठेद्दहःशेषमस्तमितेब्रह्मोदनमनुप्रवचनीयंश्रपयित्वाचार्यायवेदयीता
चार्यःसमन्वारब्धेजुहुयात्सदसस्पतिमद्भुतमितिसाविंद्वितीयंयद्यात्रिंचातऊर्ध्वमनूक्तंस्या
दृषिभ्यस्तृतीयंसोविष्टकृतंचतुर्थंब्राह्मणान्भोजयित्वावेदसमाप्तिंवाचयीतातऊर्ध्वमक्षारा
लवणाशीब्रह्मचार्यधःशायीत्रिरात्रंद्वादशरात्रंसंवत्सरंवाचरितव्रतायमेधाजननंकरोत्यभिं
दितायांदिश्येकमूलंपलाशंकुशस्तंबंवापलाशापचारेप्रदक्षिणमुदकुंभेनत्रिःपरिषिंचेत्तदा
चयतिसुश्रवःसुश्रवाअसियथात्वंसुश्रवःसुश्रवाअस्येवंमांसुश्रवःसोश्रवसंकुरु॥ यथा ॥२॥
त्वंदेवानांयत्रस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासमिमंतेनवापनादिप

रिदानोंव्रतादेशनंव्याख्यातमित्यनुपेतपूर्वस्याथोपेतपूर्वस्यकृताकृतंकेशवपनंमेधाजननंचा
निरुक्तंपरिदानंकालश्रुतसवितुर्वरेणीमहइतिसावित्री॥२२॥ऋत्विजोवरणीतेन्यूनानतिरिक्तागा
न्येमातरःपितरश्चेतियथोक्तंपुरस्ताद्वनऋत्विजोवरणीतरत्येकेब्राह्मणमेवप्रथमंवरणीतेथहो
तारमध्वर्युमथोद्गातारंसर्वान्वायेहीनेकाहेर्याजयंतिसदस्यंसप्तदशंकोषीतकिनःसमाम
नंतिसकर्मणामुपद्रष्टाभवतीतितदुक्तमृग्भ्योयमृत्विजोवृणुध्वंकल्पयतइतिहोतारमेवप्रथ
मंवरणीतेग्निर्मेहोतासमेहोताहोतारंत्वामुवृणइतिहोतारंचैवमामेब्रह्मासमेब्रह्माब्रह्माणं
त्वामुवृणइतिब्रह्माणमादित्योमेध्वर्युरित्यध्वर्युंपर्जन्योमउद्गातेत्युद्गातारमापोमेहोत्रांश
क्षित्यइतिहोत्रकान्त्रभ्योमेचमसाध्वर्यवइतिचमसाध्वर्यूनाकाशोमेसदस्यइतिस
दस्यंसवृतोजपेन्मेहन्मेवोचोभगोमेवोचोयशोमेवोचःस्तोममेवोचःक्षत्रं

मेवो वोभुक्तिं मेवोच सूक्तिं मेवोचः सर्वं मेवोचत्विजापित्वाग्निष्टो ता सते होता होतारं ते मानुषा
ति होताप्रतिजानीतेचं इन्द्रा सते ब्रह्मा सते ब्रह्मा ब्रह्मैनमित रेयथा देशं तन्मा मवतु तन्मा विशतु तेनभू
यिषी येति चयाजयिष्यन्य स्तमार्त्विज्यम कार्यमहीन स्यनी चदक्षिणु स्यव्यधिन स्यातुर स्यय
ष्मगृहीत स्यानुदेश्यभिशा स्त स्यशिक्षयो नेरिति चैतेषां सोमप्रवाकेपरिप्छेकोयुतेः कऋत्विजः
का दक्षिणातिक न्याणोः सहसंप्रयोगान्मा संमभ्नीयुर्नस्त्रियमुपेयुराऋतोरपवर्गादेतेनाग्नेब्रह्म
णावरुध्यतेति दक्षिणाग्नावाज्याहुतिं हुत्वा यथार्थं प्रव्रजेद्देवमनाहिताग्निर्गृह्यमाग्नेराहरणंभी
मरथेनरथेतयर्चा॥२३॥ऋत्विजोदत्वामधुपर्कमाहरेत्स्नातकायोपस्थितायेरातेचाचार्यश्च
शुरपित व्यमातुलानांचदर्भनिमन्थानीयंसर्पिर्वास्तरणंवेलाभिर्वाःपाद्यमर्घ्यमाचमनीय
मधुपर्कोगोरितेषांत्रिस्त्रिरेकैकंवेदयंते॥अहंवर्ष्मसजातानांविधृतामिवसूर्यः॥इदंतम
पितिष्णामियोमाकश्चाभिदासतीयदग्नेविष्टरंउपविशोदाङ्मुखस्यवापादौप्रक्षालापयेत

MEMORIAL

दक्षिणमग्नेब्राह्मणायप्रयच्छेत्स्वयंश्मश्रूण्यप्रक्षालितपादोर्घ्यंमंजलिनाप्रतिगृह्याथाचमनी
येनाचामत्यमृतोपस्तरणमसीतिमधुपर्कमादायमापानीएतोमित्रस्यत्वाचक्षुषाप्रतीक्षे
तिदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंजलिनाप्रतिगृह्यस
व्येपाणौकृत्वामधुनाक्रतायतेतिदक्षेनानेक्ष्यानामिकयांचोगुष्ठेनत्रिःप्रदक्षिणमालोड्य
नसमस्तागायत्रेणछंदसाभक्षयंतिपुरस्तान्निमार्ष्टिकृत्वास्त्रैष्टुभेनछंदसाभक्षयं
तिदक्षिणतआदित्यास्त्वाजागतेनछंदसाभक्षयंतिपश्चादिश्वेतोदेवा आनुष्टुभेनछंद
साभक्षयंतिसक्तरतोभूतेभ्यस्त्वेतिमध्यान्निरुह्यविराजोदोहोसीतिप्रथमंग्रासंभक्षयादि
राजोदोहमशीयेतिद्वितीयंमयिदोहःपद्यायैविराजइतितृतीयंनसर्वेनत्सिंगछेद्ब्राह्मणायो
दङ्मुखिश्चप्रयछेदन्नाभेक्षन्सर्वंगाथाचमनीयेनाचामत्यमृतापिधानमसीतिसत्यंत्वर्तेश्री

र्मचिश्रीः श्रयतामिति द्वितीयमाचांतोदकायगंधेदूर्वेतेहतोमेपापमापाप्मामेहत इतिजपित्वोकुरुते
तिकारयिष्यन्माताऽऽपोदुहितावसूनामितिजपित्वोऽमुत्रेऽजतेत्यस्यस्थन्नामांसोमधुपर्कोभूत
तिभवति॥२४॥ इतिगृह्यसूत्रेप्रथमोध्यायः॥ ॐस॥ श्रावण्यांपौर्णमास्यांश्रवणाकर्मोक्षतसक्तूनांव
र्धकलशंपूरयित्वादर्वीचबलिहरणींनवेशिक्यनिदधातिसक्तधानाःकृत्वासर्पिषाधीअनक्त्यस्तमि
तेस्थालीपाकंश्रपयित्वैककपालंचपुरोळाशंमन्नेनयसुपथारायेअस्मानितिचतसृभिःऋत्यच
ऊखापाणिनैककपालमच्युतायुभौमायस्वाहेत्यविलुप्तस्यादाविःपथोनामानोअग्नेनसजोअ
घायेत्यनमाशायेनाभिजुहोतिशंनोसंतुवाजिनोहवेष्विंद्रस्कंधानाअंजलिनामास्योभ्यइतरा
दर्धाकलशात्सक्तूनादर्वैपूरयित्वाऽनुपतिष्ठन्पशुचोदेशेपोवनिनीयसर्पदेवजनेभ्यःस्वाहे ॥११॥
तिऊखानमस्करोतियेसर्पाःपार्थिवायेअंतरिक्षायेदिव्यायेदृश्यास्तेभ्यइमंबलिमाहार्षंतेभ्य

इमंबलिमुपाकरोमीतिप्रदक्षिणंपरीत्यपश्चाद्वलेरुपविश्यसर्पोसिसर्पतंसर्पाणामधिपतिरस्य
नेनमनुष्यास्त्रायसेपूपेनसर्पान्यज्ञेनदेवास्त्वयिमासंतंत्वयिसंतःसर्पामाहिंसिषुर्ध्रुवांतेपरिद
दामीतिध्रुवासुतेध्रुवासुतस्यमात्मानमनुपूर्वंध्रुवमंतेपरिददामीत्यात्मानमंततोनेनमंतराध्य
वेयुरापरिदानात्सर्पदेवजनेभ्यःस्वाहेतिसायंप्रातर्बलिंहरेद्राप्रत्यवरोहणात्प्रसंख्यायहेकेताव
तोबलींस्तद्धरेवापहरंति॥१॥आश्वयुज्यामाश्वयुज्यांकर्मनिवेशनमलंकृत्यस्नाताःशुचिनाससः
पशुपतयेस्थालीपाकंनिरुप्यनुऊचुःपशुपतयेशिवायशंकरायपशुपतयेनमःस्वाहेतिपशुपतये
मंजलिनाजुऊयादूनमेपूर्यतांपूर्णमेमोपसदत्पशुपतयेनमःस्वाहेतिसंजूर्ऋतुभिःसंजूर्विधा
भिःसंजूरिदाग्निभ्यःस्वाहा॥संजूर्ऋतुभिःसंजूर्विधाभिःसंजूर्विश्वेभ्योदेवेभ्यःस्वाहा॥
संजूर्ऋतुभिःसंजूर्विधाभिःसंजूर्द्यावापृथिवीभ्यांस्वाहेयाहिताग्नेराग्रयणास्थालीपा
कोनाहिताग्नेरपिशूलागवे॥२॥मार्गशीर्व्याप्रत्यवरोहणंचतुर्दश्यापौर्णमास्यांवा

निवेशनंपुनर्नवीरस्यलेपनास्तरणोपस्तरणौरस्तमितेपायस्यैसेजुङ्युरपश्चेतपदाजहिपू
र्वेपाचापरेपाच॥ सस्त्रचवारुणीरिमाः सर्वाश्चराजबांधवीःस्वाहा॥ नवैश्वेतश्चाभ्यागारेहिर्जघान
किंचन॥ श्वेतायवैदार्भायनमःस्वाहेतिनात्रसौविष्टकृतभयंनः प्राजापत्येभ्यःभूयादित्यग्निमीक्ष
माणोजपतिशिवोनःसुमनाभवेतिहेमंतंमनसाध्यायासश्चाग्नेःस्वस्तरस्यास्तीर्णस्मिंनुपवि
श्यस्योनापृथिविभवेतिजपित्वासावेशेसामात्यःप्राक्शिरसाउदङ्मुखोयथाबर्हिषिमंत्रयेरन्
यान्यायान्वानंतरोमंत्रविदोमंत्रान्जपेयुःसंहार्योतोदेवाअवंतुनरतिक्रिरंतादक्षिणाःसुरवाः
प्रत्यङ्मुखाउदङ्सुखाश्चतुर्थंसंहायसौर्यापिस्वस्त्ययनानिचजपित्वान्नंस्वस्त्यात्मनाभो
जयित्वास्वस्त्यनंवाचयीत॥३॥ हेमंतशिशिरयोश्चतुर्षुमंथरपक्षाणामष्टमीघष्टका ॥१२॥
एकस्यांवापूर्वेद्युःपित्र्यंदधिदनंरसरंपायसंचतुःशरावस्यवापूपानुदीरतामवरउत्

रास्यरस्यष्टाभिर्जुहोयवतीभिर्वाकामयीताथश्वोभूतेष्टकांपशुनारुद्रालीपाकेनचाप्यनड्होय
वस्माहरेदग्निनावाकक्षमुपोषेदैषामेष्टकेतिनलेवानष्टकस्यात्तांहैकेवैश्वदेवीमनुनआग्नेयी
मेकेसौर्यामेकेप्राजापत्यामेकेरात्रिदेवतामेकेनक्षत्रदेवतामेकऋतुदेवतामेकेपित्रदेवतामेकेप
शुदेवतामेकेपशुकल्पेनपशुंसंज्ञप्यप्रोक्षणीपाकरणावज्रेवपासुरिवघमुङ्याहवपाजातवे
दःपित्र्योयत्रैनान्वेथनिहितान्पराकेमेदसःकुल्याउपैनान्स्रवंतुसस्याएताआशिषःसंतु
सर्वाःस्वाहेत्यथावसानानीस्थालीपाकस्यचाग्नेनयसुपथारायेअस्मानितिद्वेयीष्वाहेमंत
ऋतवःशिवानोवर्षाःशिवाअभयाःशरदंनः॥ संवत्सरोधिपतिःप्राणदानोहोरात्रेरूपुतादीर्घमा
युःस्वाहा॥ शांतापृथिवीशिवमंतरिक्षंयोनोदेवमयंनोअस्तु॥ शिवादिशःप्रदिशऊद्दिशोनआ
पोविद्युतःपरिपांतुसर्वतःस्वाहा॥ आपोमरीचीःप्रवहंतुनोघियोघातासमुद्रोवहंतुपापं॥

भूतंभविष्यदभयंविश्वमस्कर्मेत्रसाग्निगुप्तः स्वाराष्ट्रायापि स्वाहा॥ विश्वआदित्यावसवश्च
देवारुद्रागोसारोमरुतःसदंतु॥ ऊर्जंप्रजामम तंपिन्वमानः प्रजापतिर्मयिपरमेष्ठी दधातु स्वाहा॥
प्रजापतेनत्वदेतान्यन्यःसोविश्वरूपश्चमीआत्मपाःसोजयेदिस्कन्नं॥४॥अपरेधुरन्वष्टक्यंतस्ये
वमासस्यप्रकल्प्यदक्षिणाग्नावुपसमाधायपरिश्रित्योत्तरतःपरिश्रितस्यद्वारंकृत्वासं
मूलंबर्हिस्तिरुपसदेरविधून्वन्परिस्तीर्यहविषोवींसादयेदोदनंकृसरंपायसंदधिमंथान्मधुसं
थांश्चपिंडपितृयज्ञकल्पेनऊर्वामधुमंथवर्जंपितृभ्योदद्यात्स्त्रीभ्यश्चसुराचामामिक्षांचं
कर्षूकेभ्योदद्यात्सुवापूर्वीसुपित्र्येभ्योदद्यादपरासुस्त्रीभ्यएतेनमाघ्यावर्षप्रोष्ठपदीअप
रपक्षेमासिमासिचैवंपित्र्येभ्योयुक्तःप्रतिष्ठापयेन्नवावरान्भोजयेदयुजोवायुग्मान्यद्विपूर्वेद्यु
ग्मानितरेषुप्रदक्षिणंमुपचारोन्यवस्तिलार्थः॥५॥ रथमारोक्ष्यन्नानापार्णिभ्यांचक्रेअभिम्र ॥१३॥
शेदहंतेपूर्वेपादावारभेहृदयंतरंतेचक्रेनामदेयमक्षरंयक्षाधिष्ठानेदक्षिणापूर्वाभ्या

मारोहेहयोष्ट्रावीर्यंपशोरोहामीद्रप्योजसाधिपत्येनेतिरश्मींसंमृशेदरश्मिकान्नादेनब्रह्मणो
वस्तेजसासंगृह्णामिसत्येनवःसंगृह्णामीत्याभिप्रवर्तमानेषुजपेत्सहस्रसानिंवाजमभिवर्तस्व
रथंदेवप्रवहवनस्पतेवीड्वंगोहिभूयाइतयान्यान्पिवानस्पासानिस्थेरोगावोभवतांनीलरश
तिरश्चांगमभिमृशेत्स्रुचोमाणपथिवीधामनेहसमितिनावंनयरथेनयशस्विनंदृक्षंहदंवोविदा
सिनेप्रदक्षिणंकृत्वाफलवतीःशाखाआहरेदन्यद्वाकोटुंबंसंसरमुपयायादस्माकमुत्तमंकृधी
त्यादित्यमीक्षमाणोजपित्वारोहेद्वर्षभमासमानाभिनोयभिकामन्नयमघंद्रप्यंप्रेषाद्रय
स्तंयात्यादित्येनहोदिवोदुहितरोविभातीरितिव्युष्टायां॥६॥अथातोवास्तुपरीक्षांव्याख्यास्या
वदिष्यामोषधिवनस्पतिमघरिमकुशकीरिणंप्रभूतंकंटकिक्षीरिणंस्रुक्संमूलान्परिखा
यांहासयेदपामार्गंशाकस्तिल्वकंपरिव्याधतिचेतादृश्यत्रसर्वतआपोमध्येसमेसप्रद
क्षिणंशयनीयंपरीत्यप्राग्वःस्पंदध्वमप्रवदस्तत्सर्वंसमंसमवस्रवंभूकारपां

कारयेद्द्वन्द्वंहभवतिदक्षिणाप्रवणेसभांमापयेसाधूताहभवतियुवृनःस्तस्योक्तवाःकलहि
नःप्रमायुकोभवतियत्रसर्वतआपःप्रस्यंदेरन्त्सास्वस्ययन्यघृताच॥७॥अथैतेवीस्रूपरीक्ष
तंजानुमात्रंगर्तंखात्वातेरवपांसुभिःप्रतिपूरयेदधिकेप्रशास्तंसमेवार्तंन्यूनेगार्हतंमस्मितेपा
पूर्णंपरिवासयेत्सादकेप्रशास्तमाईवार्तंपुष्कगार्हतंश्वेतंमधुरास्वादंसिकतोनरंआस्रपास्य
लोहितंक्षत्रियस्यपीतंवैश्यस्यतत्सहस्रमीतंकृत्वायथादिक्समंचतुरस्रंमापयेदायतंचतुर
स्रंवानष्टमीरात्रयोदुंबररात्रयावाशंतातीयेनत्रिःप्रदक्षिणंपरिव्रजन्त्रोक्षत्यविछिन्नया
चोदकधारयापोहिष्टामयोभुवइतिमध्येनंरात्रंतरेषुरात्रीणांकारयेद्भर्तृघवकांशीपालमि
त्यवधायेनास्यराड्भवतीतिविज्ञायतेमध्यमस्थूणामागर्तेवधायजागृग्रोदगग्राःकुशा ॥१४॥
नास्तीर्यव्रीहियवमतीभिरपआसेचयेदच्युतायभौमायस्वाहेत्ययेनामुष्यीयमाणामनुमंत्रयेते

हेवतिष्ठंतिमितातिल्विलास्तामिरावतीमध्येपोषयतिछंती॥ओंओंआपन्नघायवआत्मकु
मारस्तरूपाआधत्सोजायतांसह॥आत्मापरिश्रितःकुंभआरंभःकलशैरयंनिति॥८॥वेरा
माधीयमानमितेनस्थूणामधिरोहवंशंदाधीयआयुःप्रतरंदधानाइतिसदृचीसूचनस्थु
शिलासुमणिकंप्रतिष्ठापयेत्पृथिव्याअधिसंभवेयंगरोवादीतिप्रेक्षाबद्धोवरत्रया॥
इरामुहंप्रशंसयनिरामपबाधतामितिवाथास्मिनपआसेचयेदेतुराजावरुणोरेवतीभि
रस्मिंस्थानेतिषतुमोदमानः॥इरांवहंतोघृतमुक्षमाणामित्रेपासाकंसहसंविशंत्विय
थेनमवयतिव्रीहियवमतीभिरद्भिर्हिरण्यमवधायशंतातीयेनत्रिःप्रदक्षिणंपरिव्रजन्त्रो
क्षत्यविछिन्नयाचोदकधारयापोहिष्टामयोभुवइतिमध्येगारंरयस्थाकीपाकंश्च
पयित्वावास्तोष्पतेप्रतिजानीह्यस्मानितिचतसृभिःप्रस्तरंकृत्वाऽनुसंस्कृत्यब्राह्मणाभो

अग्निर्नाशिर्वा वायुर्नाशिर्वा सूर्यो नाशिर्वा स्तुतिर्नाशयीत ॥ ९ ॥ उत्तरं गृहप्रपदनं बीजवतो गृहान्प्रपद्येत स्वेन
कर्षयेदुत्तरैः प्रोष्ठपदैः फल्गुनीभी रोहिण्या वा क्षेत्रस्यानुवातं क्षेत्रस्यपतिना वयमिति प्रत्यृचं
जुहुयाज्जपेद्वा गाः प्रतिष्ठमाना अनुमंत्रयेत मयोभूर्वातो अभिवातु भेषजमिति द्वाभ्यामायुर्दा
सामूर्ध्वश्चतुर्विलं मध्योपूर्णं घृतस्य च ॥ तानः संतुपयस्वतीर्ब्रह्मगो छेघ्नाद्यः ॥ उपमेतुम
योभुवं ऊर्जं नोजश्चबिभ्रतीः ॥ दुहाना अक्षितंपयो मयिगोष्ठेनिविशध्वं यथाभवाम्युत्तमो
या देवेषुतन्वमैरयंतेति चसूक्तेनोपमागानीयमेकेगणानासामुपतिष्ठेतायुरुगवीनांभू
तास्थप्रशस्तास्थशोभनाः प्रियाः प्रियोवोभूयासं मयिजानीध्वं मयिजानीध्वं ॥ १० ॥
इतिगृह्यसूत्रेद्वितीयोध्यायः ॥ हरिः ॐ ॥ अथातः पंचयज्ञादेवयज्ञोभूतयज्ञः पितृय
ज्ञोब्रह्मयज्ञोमनुष्ययज्ञइतिलघ्वग्नौजुहोतिसदेवयज्ञोयद्बलिंकरोतिसभूतयज्ञो

यत्पितृभ्योददातिसपितृयज्ञोयत्स्वाध्यायमधीतेसब्रह्मयज्ञोयन्मनुष्येभ्योददातिसमनुष्ययज्ञ
इतिनातोन्यज्ञानहरहःकुर्वीत ॥ १ ॥ अथस्वाध्यायविधिः प्राग्वोदग्वाग्रामान्निष्क्रम्यापआचम्यशु
चौदेशेयज्ञोपवीत्याचम्याक्षिणीवासादर्भाणांमहदुपस्तीर्यप्राङ्कूलानांतेषुप्राङ्मुखउपविश्यो
पस्थंकृत्वादक्षिणोत्तरौपाणीसंधायपवित्रवंतौधित्तायतेपावमानीरोषधीनांरसोयद्दर्भाः सरस
मेवतद्बलिंकरोतिघावाएथिव्योसंधिमीक्षमाणाः संमीत्यवायथायुक्तंवोमत्सानंमन्येतथा
सुकृतोधीयीतस्वाध्यायमेवपूर्वाह्णेतयः सावित्रीमन्वाहपछोर्चः सर्वामितित्तीयं ॥ २ ॥ अ
थस्वाध्यायमधीयीतऋचोयजूंषिसामान्यथर्वांगिरसोब्राह्मणानिकल्पान्गाथानाराशंसी
रितिहासपुराणानानीतियदृचोधीतेपयआहुतिभिरेवतद्देवतास्तर्पयतियद्यजूंषिघृताहु
तीभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्यद्ब्राह्मणानिकल्पान्गाथाना

राशंसीरितिहासपुराणानीयमनाऽऽकृतिभिर्यद्वेधीतेपयसःकुल्याअस्यपितॄन्त्स्वधाऽऽपइरंति
यद्घऽऽषिघृतस्यकुल्यायत्सामानिमधुःकुल्यायदथर्वांगिरसःसोमस्यकुल्यायद्ब्रह्मसपानिकल्पा
न्गाथानाराशंसीरितिहासपुराणानीयमृतस्यकुल्याःसयावन्मन्येततावद्वेधीसैतयापरिदधाति
नमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्येनमओषधीभ्यः॥नमोवाचेनमोवाचस्पतयेनमोविष्णवेम
हतेकरोमीति॥३॥देवतास्तर्पयतिप्रजापतिर्ब्रह्मावेदादेवाऋषयःसर्वाणिछंदांस्योंकारोवषट्
कारोव्याहृतयःसावित्रीसावित्रीयज्ञाद्यावापृथिवीअंतरिक्षमहोरात्राणिसाऽऽख्याःसिद्धाःसमु
द्रानद्योगिरयःक्षेत्रौषधिवनस्पतिगंधर्वाप्सरसोनागावयांसिगावःसाध्याविप्रायक्षारक्षां
सिभूतान्येवमतान्यथऋषयःप्रतर्दिनोभाध्यमाद्गत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसि
ष्ठःप्रगाथाःपावमान्यश्चऽऽक्सूक्तामहासूक्तानीतिप्राचीनावीतीसुमंतुर्जैमिनिर्वैशंपायनःपैल ॥१६॥
सूत्रभाष्यभारतमहाभारतधर्माचार्याजानंतिबाहविगार्ग्यगौतमकौंडिल्यावाभ्रव्यमांडव्य

मांडूकेयागर्गशाकपूणीवडवाप्रातीथेयीसुलभामैत्रेयीकहोलंकौषीतकंमहाकौषीतकंपैंग्यं
महापैंग्यंसुयज्ञंशांखायनमैतरेयंमहैतरेयंशाकलंबाष्कलंसुजातशाकल्यमौद्वाहिंमहौद्वाहिं
सौजामिंशौनकंमाश्वलायनंयेचान्येआचार्यास्तेसर्वेतृप्यंतितिप्रतिपुरुषंपितॄंस्तर्पयितात्रह
नेस्यद्दर्शनंसादक्षिणाथापिविज्ञायतेसयद्वितिष्ठन्व्रजन्नासीनःशयानोवायंयंक्रतुमधीतेते
नतेनहास्यक्रतुनेष्टंभवतीतिविज्ञायतेतस्यहावनध्यायोयदात्माशुचिर्यदेशः॥४॥अथातोध्यायो
पाकरणमोषधीनांप्रादुर्भावेश्रवणेनश्रवणस्यपंचम्याहस्तेनवाज्यभागोऽऽज्याऽऽहुतीर्जुहुया
त्सावित्र्यैब्रह्मणेप्रजायेमेधायेप्रज्ञायेधारणायेस्मृतयेस्मृत्यैछंदोभ्यऋषिभ्यश्चेत्यथ
दधिसक्तूंजुहोत्यग्निमीऽऽपुरोहितमित्येकाकुंभकस्तद्वन्नीदावद्स्वंराकुनेभद्रावदग्ने
नाजरन्नाधामंतेविश्वंभुवनमाधिश्रितंगंतानोयज्ञंयज्ञियाःसुशमियोनःस्योअरणःप्रति
चक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायस्तेराजन्छतंहविरितिघृतोःसमानीवआकूतिरित्येका

तच्छ्योरा रूपा महरत्येकौ ध्येष्यमाणाभ्यां वै रन्वारब्धएताभ्यो देवताभ्यो हुत्वा सोविष्टकृतं हुत्वा दधिसक्तून्प्राश्यतेनाचामेत्पवित्रपाणिः प्राक्कूलेषुदर्भेषूपविश्यादत्पात्रेदर्भान्कृत्वाग्रेसाञ्जलिकृतो अपेदोपूर्वाभ्याहृत्यः सावित्रीमत्रिरस्यस्यवेदादिमारभेतथोसर्गेषष्ठमासानधीयीतसमाप्तो ब्रह्मचारिकल्पेनयथान्यायमितरेजायोपेयस्येकेप्राजापत्यंतद्वार्षिकमित्येतदाचक्षतेमध्यमाष्ट काया मेताभ्यो देवताभ्यो न्नेनहुत्वापोध्यवयंस्तेताएवतदेवतास्तर्पयंत्याचार्यान्ऋषीन्पितॄंश्चेतदुसमा र्जनं॥५॥अथकाम्यानांस्थानेकाम्याश्चरवस्तानेवकामान्नोस्यथध्यधित स्यादुरस्यस्यभंगहो तस्यवाषळाकृतिश्चरुर्मुचामित्याहविषाजीवनायकमित्येतेन स्वन्नममनोजंदृष्ट्वाघानोदेवसवि तरितिहाभ्यांयच्चनोघुःखन्यमितिपंचभिरादित्यमुपतिष्ठतयोमेराजन्युज्योवासखावेतिवाधु ॥१७॥ वाजंभिलामनोजंदृष्ट्वापापकंपैंगेमाघ्रायाशिरस्यंदनेकर्णयोश्चनेचसुचक्षाअहमक्षीभ्यांनू यासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभयिदशक्रतूइतिजपेदग्नमनीयोगलायाज्ययाजयिलाभो

ज्यं भुक्त्वाप्रतिग्राह्यंप्रतिगृह्यैत्यंयूपंवोपहत्यपुनर्मामैत्विंद्रियंपुनरायुःपुनर्भगः॥पुनरूर्जिषा मैतुमांपुनर्ब्रह्मणामैतुमाशिषाहा॥इमेयेधिष्ण्यासोअग्नयोयथास्थानमिहकल्पंतां॥वैश्वानरोब धानोतर्पयतुमेमनोहृषंतरमस्तस्यकेतुःस्वाहेत्याज्याहुतीर्जुहुयात्साभिधोवाजपेहा॥६॥अ व्याधितंवैस्वपंतमादित्योभ्यस्तमियाद्ग्यतोनुपविशाग्नाविशेषंभूत्वायेनसूर्यज्योतिषाबाधसे तमहतिपंचभिरादित्यमुपतिष्ठेताभ्युदियाद्वेदकर्मश्रांतमनाभिरूपेणाकर्मणाधाग्येतहतिसमानसु मनसाभिश्चतस्रभिरुपस्थानंयज्ञोपवीतीनियोदकःसंध्यामुपासीतयाग्यतःसायमुत्तरापरामभिमु खोन्वष्टमदेशंसावित्रींजपेदर्धास्तमितेमंडलआनक्षत्रदर्शनादेवंप्रातःप्राङ्मुखस्तिष्ठन्नामंडलद र्शनात्पोवेतंश्रेदगारमुपहन्यादनुपतेहादेवाःकपोतइतिप्रत्यंचंजुहुयाज्जपेद्वायेवेमुत्वापथस्य रक्षयर्थंचयींचरिष्यन्त्सपूषन्विदुर्वेतिनष्टमधिजिगमिषन्मूरोवासपूषन्धनइतिमहांतमधो नमेष्यन्प्रतिमयंवा॥७॥अथैतानुपकल्पयीतस्वमावर्तमानोमणिकुंडलेवस्त्रयुगंछत्रमुपानघु

गंदंस्रजमुन्मर्दनमनुलेपनमंजनमुष्णीषमित्याचार्यायचयद्युभयोर्नीवंदेताचार्यायैवस
मिधंसंहरेदपरात्रितायांशिरोयद्धिरण्यस्यादीमन्नाघकामःपुष्टिकामस्रजस्कामोवाग्न
वर्चसकामउपवातामुभयीमुभयकामउपरिसमिधंसंलागामन्नेचब्राह्मणेभ्यःप्रदायगोदानिकंकर्म
कुर्वंस्तात्सानिमंत्रान्संनमयेद्दक्षक्रीतकेनशीतोष्णाभिरद्भिःस्नालायुवंवस्त्राणिपीवसाबसाथेइय
हंतवाससीआच्छद्योष्मन्तेजोसिचक्षुर्मेपाहीतिचक्षुषीआंजयीताष्मन्तेजोसिश्रोत्रंमेपाही
तिकुंडलेआबध्नीतानुलेपनेनपाणीप्रलिप्यसुरवमयेब्राह्मणोनुलिंपेद्वाराजन्यउदरंवैश्योप
स्थंस्त्रियोरूसरूपजीविनोनास्यनासोहिंस्यासमितिस्रजमपिबध्नीतनमालोक्षमालेतिचे
द्युःस्त्रीगिसापिधापयीतदधानांप्रतिरक्षंसर्वतोमापातमिरूपानहावास्थायादिवस्थ्या ॥१८॥
सीतिछत्रमादत्तेवैपुरसिवानस्पोसिसर्वतोमापाहीतिवैपावंडेदंमायुष्यमितिसूत्रेनम

णिकंडेप्रतिमुंचेत्सीषंरक्षातिष्ठन्समिधमादध्यात्॥८॥स्मृतंनिंदाचविधाचश्रद्धाप्रज्ञाचपंचमी॥
इष्टंदत्तमथीतंचयज्ञंसत्यंश्रुतंव्रतं॥यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिकस्यसराजन्यस्यस
पितृकस्यसपितृसराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसातीकाऋषेःशास्यसा
नूकाशास्यसप्रतीकाशास्यसर्वेदमनुष्यस्यसगंधर्वाप्सरस्कस्यसहारण्येश्वपशुभिर्ग्राम्येश्चय
न्मआत्मन्नात्मनिव्रतंतन्मेसर्वव्रतमिदमहंरक्षेसर्वव्रतोभवामिस्वाहेतिसमाग्नेवर्चइतिप्रत्यंच
समिधोधोदध्याद्यत्रैनंपूजयिष्यंतोभवंतितत्रैतांरात्रीवसेद्विघातेगुरुमर्थेननिमंत्र्यकृतानुज्ञा
तस्यवास्नानंस्येतानिव्रतोनिघ्नंतिननग्नंस्नायान्ननग्नंस्नायान्ननग्नःशयीतननग्नास्त्रियमीक्षे
तान्यत्रमेथुनादूषयतिनश्वावेन्नवृक्षमारोहेन्नकूपमवरोहेन्नानाप्लुत्यानदींतरेन्नसंग्रायमाप्याप
घेतमहद्वैभूतंस्नातकोभवतीतिविज्ञायते॥९॥गुरवेप्रस्थास्यमाणानासूत्रमुदीतेदवत्स्यामोभोर
इतिचैरूर्ध्वनाभेःप्राणापानयोरुपांश्वामंडोरंदृहरिभिरितिचोदीतेराजपतिप्राणापानयो

रूरुभ्यचास्त्यायप्रपथेदेवायस्वित्रेपरिददामीस्त्यंचसमाप्योप्राङ्रुद्रस्तौतिजपित्वामहित्रीपा॥
मित्यनुमंत्र्येवमतिरुद्रस्यनकुताश्चिद्भवतीतिविज्ञायतेवयसामनोज्ञावाचःश्लोकभिक्रद
ज्ञनुषंप्रब्रुवाणइतिसूक्तेजपेद्देवीवाचमंयभ॰जनयंतदेवाइतिचसूक्तंहिश्रुतंगर्त्तसदंयुवानमि
तिमृगस्ययस्यादिशोबिभीयाद्यस्माद्वातांदिशमुल्मुकमुभयतःप्रदीप्तंप्रस्तरस्यन्मथंवाप्रस
व्यमानोव्याभयंमित्रावरुणामघमस्वर्चिषाशत्रूरहंतंप्रतीत्यमाज्ञातारंमाप्रतिज्ञांविदंतुमि
थोभिंदानाउभयंतुमस्कृमितिसंरक्षंधनमुभयंसमाकृतमितिमंथंन्यंचंकरोति॥१०॥सर्वतो
भयादनाज्ञातादृष्टाद्याड्डतीर्ड्डुयास्थिवीदृतासाग्निनादृतातयादृतयावर्ष्मयस्माद्रुया
द्विभेमितद्वारयेस्वाहा॥अंतरिक्षंदृतंतद्वायुनादृतंतेनदृतेनदृतत्रैपायस्मात्॥द्यौर्दृतासाद्दिशे
नदृतातयादृतयावर्ष्मयस्मात्॥दिशोदृतास्ताश्चंद्रमसादृतास्ताभिर्दृताभिर्द्यौर्भिर्यस्मा॥ ॥१९॥
आपोदृतास्ताबरुणेनदृतास्ताभिर्दृताभिर्द्यौर्भिर्यस्मा॥प्रजादृतास्ताःप्रापोनदृतास्ताभि

र्दृताभिर्द्यौर्भिर्यस्मा॥वेदादृतास्तेछंदोभिर्दृतास्तैर्दृतैर्द्यौर्यस्मा॥सर्वंदृतंतद्रुद्रपा
दृतंतेनदृतेनद्यौरपायस्माद्रुयाद्विभेमितद्वारयेस्वाहेत्यथापराजितायांदिश्यवस्थायस्य
स्यास्त्रेयंजपतियतइंद्रभयामहइतिचसूक्तंरुपो॥११॥संग्रामेसमुपोढेराजानंसन्नाह्यदे
दात्वाहार्षमंतरेधीतिपश्चाद्रथस्यावस्थायजीमूतस्येवभवतिप्रतीकमितिकनच्छत्रंदुन्दुभ
यावधनुरुत्तरावाचयेत्स्वयंचतुर्थंजपेत्संनद्धेषुधिंप्रयच्छदभिप्रवर्तमानेषणीसत्तस्याश्वान
एमीभिषूनवेषमाणावाचयत्यहिरिवभोगैःपर्यतिबाहुमितितंनह्यमानमथैनंसारयमा
णेमुपारुह्योभीवर्तेवाचयतिप्रयोधकोमित्रावरुणेतिचद्वाथैनमन्वीक्षेताप्रतिरथश्चासौषर्णैः
प्रधारयंतुमधुनोच्चतस्थेसतसौपर्णसर्वादिशोनुपर्योयादृदिसमोत्रानसंवावस्थायप्रयोधये
दुपश्चासयत्पृथिवीमुतद्यामितिरथेनवुंदुभिमभिमृशेदवस्फुरापरापतंतीष्वनिसज्जयेद्यत्रवा
णाःसंपतंतीतियुध्यमानेषुजपेत्संशिष्याद्वासंशिष्याद्वा॥१२॥इतिरुद्रसूक्तेतृतीयोध्यायः॥॥

आहिताग्निश्चेदुपतपेत्स्रुच्यामुदीच्यामपराजितायांवादिक्पुरश्चर्यायामकामाअग्नयस्तस्यै
हरंत्यांसंतएनंयाममाजिगमिषंतोगदंकुर्युरितिहविर्जायतेगदःसोमेनपशुनेष्ट्वाबर्ह्यं
दनिष्वाबर्हसंस्थितेभूमिभागंखानयेद्दक्षिणपूर्वस्यांदिशिदक्षिणापरस्यांवादक्षिणाप्रवणंप्राग्व
क्षिणाप्रवणंवाप्रत्यग्दक्षिणाप्रवणमित्येकेयावानुद्धाऊकःपुरुषस्तावदायाम्यामात्रंतिर्य
ञ्चितस्यवागपितआकाशंरशनांबऊलौषधिकंकंटकिंशरिपास्त्वितियथो ऊर्ध्वंपुरस्ताद्यत्रस
र्वतआपःप्रध्वंसेरन्नेतदादहनंस्यात्क्षपणंरशनास्यकेशरशमश्रलोमनखानीत्यूर्ध्वंपुरस्तादि
मुत्यंबर्हिरास्तृणंचदधन्यच्चसर्पिरानयंस्तेसिच्यंपषदाज्यं॥१॥अथैतांदिशमग्नीनयंतियत्
पात्राणिचान्वंचंत्रेतमयुजोमिथुनाःप्रवयसःपीठचक्रेणागोयुक्तेनैयंकेनुस्तरणींगामजांवै
कवर्णांकृष्णामेकेसत्यंबाहोत्रध्वानुसंकालयंत्यन्वंचोमासाअथोनिवीताःप्रवृत्तशिखाज्येष्ठ
प्रथमाःकनिष्ठजघन्याःप्राच्यैवंभूमिभागंगर्तोदकेनशमीशखयात्रिःप्रसव्यमायतनं



परिव्रजन्प्राक्षत्सपेतवीतविचसर्पतातइतिदक्षिणापूर्वमुद्धृतांतआहवनीयंनिदधात्युत्तरपश्चि
मेगार्हपत्यंदक्षिणापश्चिमेदक्षिणमथैनमंतर्वेदीध्मावित्तिंचिनोतियोजानातिनास्मिन्बर्हिरास्ती
र्यकृष्णाजिनंचोत्तरलोमंतस्मिन्नेतंसंवेशयंत्युत्तरेणागार्हपत्यंहत्वाहवनीयमभिमुखंशिरसमु
त्तरतःपत्नीधनुश्चक्षत्रियायतामुत्थापयेद्देवरःपतिस्थानीयोंतेवासीज्यरहासोवोदीर्घनार्यभि
जीवलोकमितिकर्तारंषलेजपेद्धनुर्हस्तादादत्तस्येतिधनुरुत्तंदषलेधिज्यंकृत्वासंचितिम
चित्वासंशीर्यानुप्रहरेत्॥२॥अथैतानिपात्राणियोजयेद्दक्षिणेहस्तेजुहूंसव्यउपभृतंदक्षि
णोपार्श्वेस्रुग्वेग्निहोत्रहवणीमुरसिध्रुवांशिरसिकपालानिदक्षंग्रीवाणानासिकयोः
स्रुचौभित्वाचैकंकर्णयोःप्राशित्रहरणंभित्वाचैकमुदरेपात्रीसमवत्तधानंचचमसमुप
रिष्टाच्छ्यामशबलीऊर्वौकलूखलमुसलेजंघयोःपादयोःशूर्पंभित्वाचैकमासेचनवंतिषदा

ज्यस्यपूरयंत्सामापुत्रोदृषदुपलेकुरुतलोहायसंचकौलालमनुस्तरण्यावपामुत्लिवघाश्चिरोमु
खंप्रछाद्यदग्नेर्वर्मपरिगोभिर्व्ययस्वेतिदक्षाउदुह्यपाप्योरदध्यादुतिइवसारमेयोश्वाना
वितिदक्षिणोदक्षिणंसव्येसव्यंहृदयेहृदयंपिप्योचेकेदक्षापचारइयेकेसर्वंयथागंधिनिक्षिप्य
चर्मणाप्रछाद्यमग्नेचमसंमाविजिह्वरतिप्रपीताप्रणयनमनुमंत्रयतेसव्यंजान्वाच्यदक्षि
णाग्नावाज्याहुतीर्जुह्वादग्नयेस्वाहाकामायस्वाहा लोकायस्वाहानुमतयेस्वाहेतिपंचमीमुरसि
त्रेतस्यास्माहैवमजायथाअयंत्वदधिजायतामसौस्वर्गायलोकायस्वाहेति॥३॥प्रेष्यतियुगप
दग्नीन्प्रज्वालयतेत्याहवनीयश्चेसूर्वंप्राप्नुयास्वर्गलोकएनंप्रापदितिविद्याद्वास्यत्यसावमुत्रैव
मयमस्मिन्नितिपुत्रोदक्षिणाग्निश्चेसूर्वंप्राप्नुयान्मनुष्यलोकएनंप्रापदितिविद्याद्वास्यत्यसा ॥२१॥
वमुत्रैवमयमस्मिन्नितिपुत्रोदक्षिणाग्निश्चेसूर्वंप्राप्नुयान्मनुष्यलोकएनंप्रापदितिविद्याद्वास्य

त्यसावमुत्रैवयमस्मिन्नितिपुत्रोयुगपत्प्रासौपुरामद्विदंतिनंदह्यमानमनुमंत्रयतेप्रेहिप्रेहिपथि
भिःपूर्वेभिरिष्मतिरसमानंसएवंविद्वद्दह्यमानंसहैवधूमेनस्वर्गंलोकमेतीतिविज्ञायतउत्तरपुरस्ता
दाहवनीयस्यजानुमात्रंगर्तंखात्वाकृष्णाजिनंप्रास्यबर्हापयेत्ततोहवाएषनिष्क्रम्यसहैवधूमेनस्व
र्गंलोकमेतीतिविज्ञायतइमेजीवाविमृतेराबद्धंनेतिसत्याउतोब्रूतसनीडमाणायत्रोदकमबह
ुवतितत्प्राप्यसकुदुन्मज्जेत्कांजलिमुत्सृज्यतस्यगोत्रंनामगृह्णीयान्नावंवासांसिपरिधाय
सकृदेनान्यापीड्योदग्दक्षानिविसृज्यासतआनक्षत्रदर्शनादितिसूत्रस्यवादृश्यमानेप्रविशेयुःक
निष्ठप्रथमाज्येष्ठजघन्याःप्राप्यागारमश्मानमग्नेगोमयमक्षतोस्तिलानपउपस्पृशंतिनेतस्यां
रात्र्यामंनंपचेरन्क्रीतोत्पन्नेनवाबतेरंस्त्रिरात्रमक्षारालवणाशिनःस्युर्दशरात्रंवामहागुरु
षुदानाध्ययनेवर्जयेरन्दशाहंसपिंडेषुगुरौचासपिंडेप्रेतासुचस्त्रीषुत्रिरात्रमितरेषाचार्येषु

शातौ चासपिंडे प्रजा सुचस्त्रीष्वदंतजातेपरिजातेचैकाहंसब्रह्मचारिणिसमानप्रवरामीषयेवश्रोत्रि
येति॥४॥संचयनमूर्ध्वंदशाभ्याःरूक्षपक्षस्यायुजास्वेकनक्षत्रेलक्षणोक्तेभेपुमांसमलक्षणायांस्त्रि
यमयुजोमिथुनाःप्रनयसःक्षीरोदकेनशमीशाखयात्रिःप्रसव्यंपरिव्रजन्प्रोक्षतिशीतिकेशीतिका
वतीत्यनुष्टोपकनिष्ठिकाभ्यामेकैकमस्थ्यसंहरयंतोवदन्युःपादोपूर्वंशिरउत्तरंसुसंचितंसंचित्य
पवनेनसंपूयप्रत्रसर्वतआपोनाभिष्यंदेरन्नन्यावर्षाभ्यस्तत्रगर्तेवदन्युरुपसर्पमातरंभूमिमेता
मित्यन्तरयापांसूनवकिरेदेवकीर्योन्तरादुनेस्तभ्नामीतिकपालेनापिधायाथानवेप्रत्याव्रज्याप
उपस्पृश्यश्वाद्दमस्मेदघु॥५॥गुरुणाभिमताअन्यतोवापक्षीयमाणाअमावास्यायांशांतिक
र्मकुर्वन्पुरोदग्नेसहभस्मानंसहायतनंदक्षिणा[illegible]हरेयुःकव्यादमग्निंप्रहिणो ॥२२॥
मिदूरमित्यर्द्धर्चेनतंचतुष्पथेन्युप्ययत्रगात्रिःप्रसव्यंपरियंतिसव्यैःपाणिभिःसव्यान्रूनाभाना

अथानवेक्षंप्रस्थाप्यव्यापडपस्पृश्यकेशश्मश्रुलोमनखानिवापयित्वोपकल्प्यस्त्रीरत्नबान्मणिका
न्कुंभानाचमनीयांश्चशमीसुमनोमालिनःशमीमयमिध्मंशमीमय्यावरणीपरिधीश्चानडुहंगो
मयंचर्मचनवनीतमभ्यानंचयास्योयुवतयस्तावंतिकुशपिंजूलान्यग्नेवेलायामग्निंजनयेद्धैवा
यमितरोजातवेदाइत्यर्द्धर्चेनतंदीपयमानाआसतआगांतराद्रायुष्मतंकथाःकीर्तयंतोमागत्या
नीतिहासपुराणानीत्याख्यापयमानाउपरतेषुशब्देषुसंप्रविष्टेषुवागर्हंनिवेशनंवादक्षिणाद्वार
पक्षप्रक्रम्याविछिन्नामुदकधारांहरेन्नंतुतन्नव्रजसोभानुमन्निहीत्योत्तरस्माद्द्वाग्निमुपसमा
धायपश्चाद्दस्यानडुहंचर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमतस्मिंनमासानारोहयेदारोहतायुर्जरसं
वृणानाइतीमंजीवेभ्यःपरिधिंदधामीतिपरिधिंपरिदध्यादंतर्मृदंदधतांपर्वतेनेत्यभ्यानमुत्तर
तोग्नेःकृत्वापरमस्योअनुपरेहिपंथामितिचतसृभिःप्रस्रवंकृत्वायथाहान्यनुपूर्वंभवंतीत्यमासा

नीभेतसुवतयःपथकृपाणिभ्यांदर्भतरुपाभ्यांनैर्ऋतेनोगुल्फोपकनिष्ठिकाभ्यामक्षिणीआस्रज्य
पराङ्ङ्यावित्सजेयुरिमानारीरविधवाःसुपत्नीरियंजानाईक्षेताश्मन्वतीरीयतेसंरभध्वमित्यश्मा
नंकर्तीप्रथमोभिमृशेदथापरानितायोदिश्यवस्थायाग्निनानडुहेगोमयेनचाविछिन्नयाचोदक
धारयापोहिष्ठामयोभुवस्तितरेनपरीमेगामनेषतेतिपरिक्रामेत्सकृज्जपेत्सिगलोनडुन्परिणयत्या
दिसकृदाहरंस्थोपविशंतियत्राभिरंस्यमानाभवंत्यहतेनवासासाप्रघाघासतेस्वपंतओदयादुरि
तआदित्येसौर्यंपाप्मानंनिर्जपित्वान्नंसंस्कृत्यापनःशोशुचदघमितिप्रस्तरंहृत्वाब्राह्मणा
न्भोजयित्वास्वस्त्ययनंवाचयीतगोःकंसोहतंवासभ्रदक्षिणा॥६॥अथातःपार्वणेहेम्नोकाम्यआ
भ्युदयिकएकोद्दिष्टेवाब्राह्मणान्शुचीनलंकृतसंपन्नानेकेनवाकर्मणापितॄन्स्नाताऋतपश्चो ॥२३॥
चानाचांतानुदङ्मुखान्पित्वदुपवेश्यैकैकमेकैकस्यद्वौद्वौत्रीन्त्रीन्वाऽर्घहोफलभूयस्त्वंनलवै

वंसर्वेषांकाममनायेपिंड्यैर्व्याख्यातमपःप्रदायदर्भान्निरुप्याभुक्तानासनंप्रदायापःप्रदाय
तेजसाभ्रमयमन्मयेषुत्रिषुपात्रेषुकव्येषुवादर्भांतर्हितेषुपआसिञ्चन्नोदेवीरभिष्टयइत्य
नुमंत्रिताःसुतिलानावपतितिलोसिसोमदेवत्योगोसवेदेवानिर्मितः॥प्रत्यग्निःप्रतिरक्षयापितॄ
निमांलोकान्त्रीपायाहिनःस्वधानमइतिप्रस्तरेनेतरपाण्यंगुष्ठांतरेणोपवीतिसाद्दक्षिणेनवा
सव्येपाणौहीतेनपितरिदंतेअर्घ्यंपितामहेदंतेअर्घ्यंप्रपितामहेदंतेअर्घ्यमित्यप्पूर्वीताःप्रतिग्रा
हयिष्यन्त्सरुस्वरुस्वधाइतिअर्घ्यौप्रस्तरेअनुमंत्रयेतयादिव्याआपःपृथिविसंबभूवुर्याअं
तरिक्ष्याउतपार्थिवीर्याः॥हिरण्यवर्णायत्रियास्नानआपःशंस्योनाभवंतिसःस्त्रवंत्समव
नीयताभिरद्भिःपुत्रकोमुखमनक्ति॥नोद्वरेस्तथमंपात्रंपित्र्यामर्घ्यपातितं॥आरतास्त
त्रतिष्ठंतिपितरःशौनकोब्रवीत्॥उद्धरेपदिवेसात्रंविद्यतंवायदाभवेत्॥ततःसुरंभनेछ्राद्धं

कुद्दैः पितृगणैर्गतैरिति ॥ ७ ॥ एतस्मिन्काले गंधमाल्यधूपदीपाघ्राणानां प्रदानमुच्छ्रयघृतात्क
मन्नमनुतापयस्मैकरिष्येकरवैकरवापीतिवाप्रत्याघनुज्ञाक्रियतांकुरुष्वकुर्वित्यथाग्नौजुहोति
यथोक्तंपुरस्तादथनुज्ञायांपाणिघेवाग्निमुखावैदेवाः पाणिमुखाःपितरइतिहिब्राह्मणंयादि
पाणिघाचांतेघन्यदन्नमनुदिशत्यन्नमन्नेस्वंदत्तमथकामितंतत्तान्नोमधुमतीश्रावये
दन्नमीमदंतेतिचसंपन्नमितिपृच्छायघदन्नमुपभुक्तंतत्स्थालीपाकेनसहापिंडार्थमुद्धृत्य
शेषंनिवेदयेदभिमतेनुमतेवाभुक्तवत्सचनाचांतेषुपिंडांनिदध्यादाचांतेष्वेकेप्रकीर्यान्नमुपवीयो
स्वधोच्यतामितिविसृजेदस्तुस्वधेतिवा ॥ ८ ॥ अथशूलगवःशरदिवसंतेवाईयाश्रेष्ठंस्वस्य
यूथस्याकृष्टिपक्वंकल्माषमिसेकेकामंरुद्रमालोहवांश्रेद्व्रीहियवमतीभिरद्भिरभिषिच्य ॥२७॥
शिरस्तआभसतोरुद्रायमहादेवायजुष्टोवर्धस्वेतितंवर्धयेत्संपन्नदंतमथैनंवायतिमा

यांदिश्यसंदर्शनेग्रामादूर्ध्वमर्धरात्रादुदितरत्येकेवैघंचरित्रंतंब्रह्माणमुपवेश्यसपलाशामाईशा
खांयूपंनिखायव्रतयोक्त्रशरज्जूवारशनेअन्यतरयायूपंपरिवीयान्यतरयार्ष्टिशिरसिपशुंबध्वा
यूपेरशनायांवानियुनक्मियस्मैनमस्तस्मैत्वाजुष्टंनियुनज्मीतिप्रोक्षणादिसमानंपशुनाभिरोषा
न्वश्यामःपाश्यापलाशेनवापेवपांजुहुयादितिहविःसायतेहरायस्वाहाशर्वायशिवायभवाय
महादेवायोग्रायपशूनांपतयेरुद्रायशंकरायेशानायस्वाहेतिषड्भिर्वोत्तरैरुद्रायस्वाहेति
वाचतस्रुचनस्रुकुशसूनासुचतस्रुदिक्षुबलिंहरेद्यास्तेरुद्रपूर्वस्यांदिशिसेनास्ताभ्यएनं
नमस्तेअस्तुमामाहिंसीरित्येवंप्रतिदिशंवादेशनंचतुर्भिःसूक्तैश्चतस्रोदिशउपतिष्ठेतरुद्रायेति
मारुद्रायातेपितरिमारुद्रायास्थिरधन्वनेतिसर्वरुद्रायेषुदिशामुपस्थानंलुपान्फलीकर
णांश्चपुंछंचर्मशिरःपादानित्यन्नावनुप्रहरेद्वोगंचर्मणाकुर्वंतेसिरुणावत्यउत्तरतोग्नेर्दर्भ



ग० सू० ॥२५॥

वीतामुकुशासूनासुवाशोपितंनिनयेछ्यासिनीर्चीषिणीर्विचिन्वतीःसमश्नुतीःसर्पायहोनेनवःप्रा
पायथादड्डनदस्यश्वासिनीर्चीषिणीर्विचिन्वतीःसमश्नुतीसर्पाएतद्वोऽन्तरुरुधमितिसर्पेषो
यत्रास्यगृह्यंवावस्तुतंभवतितद्रक्षंतिसर्पाःसर्वाणिहवाअस्यनामधेयानिसर्वाःसेनाःसर्व
पयुह्यमाणानीयेवंविद्यजमानंप्रीणातिनास्यब्रुवाणंचनाहिनस्तीतिविज्ञायतेनास्यप्राश्नीयान्ना
स्यग्राममाहरेयुरभिमानुकोहैपदेवःप्रजाभवतीयमात्यानंततःप्रतिषेधयेन्नियोगानुप्राश्नीयो
स्वस्त्ययनइतिसएषश्लोकगोधन्योलोक्यःपुण्यःपुष्यःपशव्यआयुष्योयशस्यइष्टान्नमु
स्रजेन्नानुस्रष्टस्यान्नहापशुर्भवतीतिविज्ञायतेशंतातीयंजपन्नहानियासभूनासुपता
पेतमेवदेवंमध्येगोष्ठस्थंजेतस्थालीपाकंसर्वहुतंबहिराज्यंन्नानुग्रहस्यधूमतोगा ॥२५॥

आनयेछंतातीयंजपन्नभूनांमध्यमियान्मध्यमियान्नमःशौनकायनमःशौनकाय॥९॥
इसाश्वलायनगृह्यसूत्रेचतुर्थोध्यायः॥ ॥ श्रीकृष्णार्पणमस्तु॥शुभंभवतु॥
रामलोपनामकनारायणसूनुश्रीधरेनलिखितं॥स्वार्थं॥परार्थं॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

२६ 77

॥इति गृह्यसूत्रं समाप्तं॥